दिनाङ्क :-17.03.2025 प्रातः - 06:55

## अथ वार्ताः

### प्रधानमन्त्री- पॉड्कास्ट्-संवादः

प्रधानमन्त्रिणा नरेन्द्रमोदिना अवधानं दत्तम् भारतम् तटस्थम् नास्ति अपि तु शान्तिं प्रति दृढतया प्रतिबद्धमस्ति इति। असौ अधोरेखितवान् यत् भारतं यदा शान्तेः विषयं प्रवदति तदा समग्रं हि विश्वं श्रुणोति यतो हि भारतवर्षं गौतमबुद्धस्य महात्मागान्धिनः च भूमिः अस्ति इति। लेक्स् फ्रिड्मान् इत्यनेन सह पोड्कास्ट्-संवादमध्ये श्रीमोदी अवदत् यत् भारतीयाः सौहार्दं शान्तिं च समर्थयन्ति इति। पाकिस्तानदेशस्य विषये एकस्य प्रश्नस्य प्रत्युत्तरे प्रधानमन्त्रिणा श्रीमोदिना पाकिस्तान-देशः अशान्तेः वैश्विककेन्द्रः इति घोषितः। असौ प्रत्यपादयत् यत्, पाकिस्तान्-देशः विभाजनानन्तरं सौहार्दपूर्णं सहास्तित्वं न पालयितुम् अचिनोत्, भारतस्य विरुद्धं परोक्षयुद्धं कर्तुं च अचिनोत् इति। अपि च प्रधानमन्त्री उक्तवान् यत् भारतं निरन्तरं पाकिस्तानदेशम् सर्वकार-प्रायोजिताङ्कवादस्य मार्गम् परित्यज्य आग्रहम् अपि करोतीति। अमेरिका-देशस्य राष्ट्रपतिः डोनाल्ड् ट्रम्प्-इत्येषः तं कठोरः वार्ताकारः इति उक्तवान् इति विषये श्रीमोदी अवदत् यत्, तं कठोर- वार्ताकारः इति वक्तुं, विविध-मञ्चेषु तस्य प्रशंसां कर्तुं च राष्ट्रपते ट्रम्प्-इत्यस्य उदारतास्ति इति। सः सूचितवान् यत् श्री ट्रम्प् इत्यस्य कृते अमेरिकादेशः प्रथमः अस्ति, तस्य कृते च सर्वदा भारतं प्रथमम् अस्ति इति।

### प्रधानमन्त्री- रायसीनासंवाद

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य नवदिल्ल्यां पञ्चविंशत्यधिक-द्विसहस्रतमवर्षस्य रायसीना-संवादस्य दशम-संस्करणस्य उद्घाटनं विधास्यते। न्यूजीलैण्डदेशीयः प्रधानमन्त्री क्रिस्टोफर-लक्सन-इत्येषः अस्य औद्घाटनिकसत्रस्य मुख्यातिथिः भविष्यति अथ च स्वभाषणमपि प्रदास्यति। अयं त्रिदिवसात्मकः रायसीनासंवादः अद्यारभ्य नवदशदिनाङ्कपर्यन्तं प्रचलिष्यति। अस्य वर्षस्य संवादस्य शीर्षको विद्यते- **कालचक्रः- जनाः शान्तिः ग्रहश्चेति।** कार्यक्रमावधौ विश्वस्य निर्णायकाः विचारकाः च षट्सु विषयाधारितस्तम्भेषु विविधप्रकारकाणां वार्तालापेषु पारस्परिकरूपेण संलग्नाः भविष्यन्ति।

### निर्मला-प्रशिक्षणयोजना

वित्तमन्त्री निर्मलासीतारामन् इत्येषा अद्य प्रधानमन्त्री-प्रशिक्षुता-योजनायै पीएम-आई-एस्-इत्येतस्यै समर्पितस्य अनुप्रयोगस्य एकस्य उद्घाटनं करिष्यति। अस्योद्घाटनस्य लक्ष्यम् अस्याः योजनायाः द्वितीयचरणाय सरलपञ्जीयन-सौविध्यमिति वर्तते। यस्य कृते मार्चमासस्य एकत्रिंशद्दिनाङ्कं यावत् आवेदनं स्वीकर्तुं शक्यते। अनुप्रयोगोऽयम् जङ्गमदूरवाण्याः व्यापकसहयोगस्य लाभं बहूभ्यः आवेदनकर्तृभ्यः उपयोगकर्तृणाम् अनुकूलं विकल्पं प्रदास्यमानायाः जङ्गमदूरवाण्याः व्यापकसहयोगस्य उपयोगेन सीमित-

सङ्गणक-प्रवेशस्य समस्यां समापयितुम् अयम् अनुप्रयोगः प्रयतते। अस्य उद्घाटनेन सहैव कोलकातानगरे पीएम्.आई.एस्. इत्येतस्य कृते समर्पितस्य एकस्य सुविधाकेन्द्रस्यापि स्थापना भविष्यति।

**डोभालः-गबार्डसंवादः**

राष्ट्रियसुररक्षापरामर्शदः अजीतडोभालः ह्यः नवदिल्ल्यां अमरिकादेशस्य राष्ट्रियगुप्तचरनिदेशिकया तुलसी-गबार्ड-इत्यनयाः सह मन्त्रणां साधितवान्। प्राप्तसूत्रानुसारि उभौ पक्षौ भारतामेरिकासम्बन्धानाम् अनेकेषु प्रक्रमेषु विस्तृतां चर्चां समनुष्ठितवन्तौ । गबार्ड इत्येषा प्रधानमन्त्रिणः नरेन्द्रमोदिनः आमन्त्रणे श्वः रायसीनासंवादकार्यक्रमे स्वस्य सम्बोधनेनसाकमेव एशियाचरणस्य यात्रां सम्पूरयिष्यति।

**कबड्डी प्रतियोगिता**

पञ्चविंशत्यधिक-द्विसहस्रतमवर्षीयः कबड्डी-विश्व-चषकः अद्य सायंकाले इंग्लैण्डदेशे समारप्स्यते। भारतीय-पुरुषाणां दलं वोल्वरहैम्पटन-नगरे इटली-दलेन सह स्पर्धिष्यते।

**क्रिकेट्**

क्रिकेट्-क्रीडायाम् इण्डियामास्टर्स-इत्यनेन रायपुरे वेस्टइण्डिज-मास्टर्स-इत्येतं षड्भिः स्तोभैः पराजित्य प्रथमा अन्ताराष्ट्रिय-मास्टर्स-लीग-टी-20 इत्युपाधिः अधिगता।

।। इति वार्ताः।।